# वर्णसमीक्षावैशिष्ट्यम्

**डॉ. रघुवीरप्रसाद शर्मा**
संस्कृत विद्वान, अध्येता - पं. मधुसूदन ओझा साहित्य

विद्यावाचस्पतिः समीक्षाचक्रवर्त्ती पण्डितवर्गः श्रीमधुसूदनः ओझा महोदयः स्वगुरोः पण्डितशिवकुमारशास्त्रिणः शुभाशीर्वादेन अनवरतं सारस्वतसाधनायां निरतो भूत्वा वेदवेदाङ्गादिशास्त्रेष्वन्तर्निहितां वैज्ञानिकतां विद्वदभिमुखं प्रास्तोतुं महान् प्रयासो विहितः। अस्मिन् प्रयासे तदीयं साफल्यं विश्वस्य विश्वेषां वैज्ञानिकानां कृतेऽद्भुतश्चमत्कारोऽलक्ष्यत। सः सम्पूर्णमात्मसात्कृतं एतद्विषयिणं प्रतिपाद्यं पञ्चधा प्रविभाज्य तत्सौविध्यार्थं तेषामपि पञ्चानां विभागानामवान्तरविषयविभागा अपि सम्पादिताः। ग्रन्थानाममीषां वर्गपञ्चकमिदं क्रमशो ब्रह्मविज्ञानं यज्ञविज्ञानं इतिहासः वेदाङ्गसमीक्षा आगमरहस्यञ्चेति गण्यते। एषु पञ्चसु प्रविभागेषु ब्रह्मविज्ञानविषयकाश्चत्वारिंशद् ग्रन्थाः यज्ञविज्ञानविषयका विंशति ग्रंथाः, इतिहासविषयका अष्टादश ग्रन्थाः, वेदाङ्गसमीक्षान्गर्तत त्रिंशद्ग्रन्थाः, आगमरहस्यान्तर्गतं विंशत्युत्तरशतं ग्रन्थाः सन्ति।

वाक्पदिका वेदाङ्गसमीक्षासन्दर्भे विहितेषु चतुर्षु विभागेष्वेकतमाऽस्ति। तथा हि वेदाङ्गसमीक्षायाश्चत्वारो विभागा एवं विनिर्दिष्टा वर्तन्ते- (1) वाक्पदिका (2) ज्योतिश्चक्रधरः (3) आत्मसंस्कारकल्पः (4) परिशिष्टानुग्रहश्च। एषु वाक्पदिका शिक्षायाःप्रतिपादको ग्रन्थोऽस्ति। ज्योतिश्चक्रधरः ज्योतिर्विज्ञानस्य प्रतिपादको ग्रन्थोऽस्ति। आत्मसंस्कारकल्पः धर्मशास्त्रस्य प्रतिपादको ग्रन्थोऽस्ति। परिशिष्टानुग्रहश्च विशिष्टवेदान्तर्गूढविषयाणां प्रतिपादको ग्रन्थो वर्तते।

वाक्पदिकान्तर्गतमपि पञ्च अवान्तरग्रन्थानामुपकल्पनं दृश्यते- (1) वर्णसमीक्षा (2) छन्दः समीक्षा (3) पदनिरुक्तम् (4) पथ्यास्वति (5) व्याकरणविनोदश्च। एषु ग्रन्थेषु वर्ण-अक्षर-पद-वाक्य-भाषा निरुक्तिप्रभृतीनां रहस्यात्मकं ज्ञानं विशदविवेचनेन समाहितमस्ति। प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते ' इति दिशा वर्णसमीक्षायां ग्रन्थप्रणयनोद्देश्यमप्येवं प्रतिपादयति विद्यावाचस्पति पं. मधुसूदन ओझा महोदयः-

> **''धर्माभ्युदयः सदाभ्युदयते धर्मश्च साहित्यतो,**
> **विज्ञाप्योऽप्यविनाकृतं तदपि वा वाक्यैश्च वाक्यं पुनः।**
> **सम्पद्येत पदैः पदं पुनरिदं वर्णाहितं वर्ण्यते,**
> **तस्माद्वर्णनिरूपणं प्रथमतः कर्त्तुं समुद्यम्यते।।''**[1]

वर्णसमीक्षायां वाग्विज्ञानं विवेचयन्तः समीक्षाचक्रवर्त्तिनः पण्डित ओझा महोदय मनःप्राणवाक्तत्त्वेषु प्राणतत्त्वस्याधारभूतत्वं स्वीकृतम्। तन्मतेन प्राणेनैव मनः वाक्च उत्पद्यते। उत्पद्यमाने अपि उभे तस्मिन्नेव प्राणे सन्तिष्ठेते। आध्वर्यवश्रुत्यनुसारं प्राण एवर्षिरभिमतः। अयं प्राण एवं तेजोमयो भवन् वाक्त्वं प्रतिपद्यते। आत्मा वाङ्मयः प्राणमयो मनोमयश्चास्ति। प्राणमय आत्मा कारणात्म-कार्यात्मभेदाद् द्विधा समाख्याता। तत्र कारणात्मैव मुख्यप्राणः यः साक्षान्मनोवाग्रूपो विज्ञातव्यः। कार्यात्माख्यश्चान्यः प्राणोऽवान्तरः मनोवाचं मध्यस्थीकुर्वन् तत एवाविर्भूतोभवति। वाचः प्राणत्वेनैव छन्दोऽवतरणं सम्भवति।

अग्निर्वाग्भूत्वा मुखं प्राविशदित्येतरेयापनिषदुक्तमन्त्राधारेणाग्नेय्या वाचः संस्थितिः सम्भवति। अग्निरूपोऽप्ययं प्राणः कारणात्मकार्यात्मभेदाद् द्वैविध्यमापद्यते। प्रश्नोपनिषदः ''प्रजाकामो वै प्रजापतिस्तपस्तप्त्वा मिथुनमुत्पादयते रयिं च प्राणं च, एतौ मे बहुधा प्रजाः करिष्यत'' इति वचनेनेदं सिद्ध्यति यत् प्राण एवाग्निरस्ति, रयिशब्दोऽत्र सोमस्य वाचको वर्तते। उभाविमौ 'अग्नीषोमात्मकं जगत्' इत्युनसारं जगतः कारणद्रव्ये स्तः । एवं चेत्प्राणस्याग्निपदेनाभिधानादाग्नेयी वागियं प्राणमूलिका। कौषीतकिश्रुते, 'प्रज्ञा वै इन्द्रः वायुः प्राणः' इति वचनेनेदं प्रतिपादितं यत् प्रज्ञां वायुं च विना न वागुत्पद्यते। वागुत्पत्तेर्मूलकारणं वायुः। प्रज्ञात्वर्थेन सम्बन्धंस्थाप्य अक्षरविभागेन पदवाक्यादिरूपे वायोरेव विशकलने करोति।

कृष्णयजुर्वेदानुसारं 'वाग्वै पराच्यव्याकृता अवदत्' अर्थात् पराची वाक् अव्याकृतरूपे व्यवहृता भवति स्म। इन्द्रेण वाचो मध्यभागस्य विच्छेदने कृते इयं वाक् व्याकृता संजाता। प्राणात्मकत्वादपि वाच ऐन्द्रत्वमुपपद्यते। प्राणस्यैवेन्द्रत्वात्। केचनात्र प्रवदन्ति यत् वाक् इन्द्रियमस्ति। इन्द्रियत्वं विना वाच इन्द्रेण समबन्धो नोपपद्यते। एवं चेदिन्द्रसम्बन्धादेवेयं वाक् ऐन्द्रीत्युच्यते। इन्द्र एव ज्ञानाधिकरणमात्मा। अस्मादुत्पद्यमानत्वादेवेयं प्राणजन्याऽप्युच्यते। एवञ्च प्राणादात्मनो वा वाच उत्पत्तिरभिमता। वैय्याकरणा अपि मतमेतत्समर्थयन्ते। उक्तञ्च भगवता पाणिनिनाऽपि स्वकीयशिक्षाग्रन्थे -

**''आत्माबुद्ध्या समेत्यार्थान् मनोयुंक्ते विवक्षया।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।**
**मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।''**[2]

एवं श्रुतिप्रमाणैःसुतरां सिद्ध्यति यत् प्राणतत्त्वमेव वाग्रूपे रूपान्तरितं भवति। एतदनन्तरं स्वरसमीक्षाप्रकरणान्तर्गतं नवविधस्वराणां व्यवस्थानम् ओझा महोदयाः प्रतिपादयन्ति। तदनुसारं स्वराःश्वास-नाद-विवार-स्थान-व्यक्ति-गेह-श्रुति-सवन-भागलक्षणेषु नवसु रूपेषु विज्ञायन्ते। एभ्य एव नवभ्यः सप्त स्वराः सांगीतिकाः सन्ति। सवनभागलक्षणयोस्सांगीतिकाभावात् स्वराणां साप्तविध्यं संगीतशास्त्रेऽभिमतम्। शिक्षायामपि एषामुपयोगो विशेषेण श्रुताध्याये मन्त्रोच्चारादिषु उदात्तानुदात्तस्वरिताद्युच्चारणसन्दर्भितः स्वीक्रियते। लौकिकेऽपि छन्दसामारोहावरोहादिक्रमे

उच्चारणकालदृष्ट्या एषां महत्त्वं प्रतिपादितम्। यथोक्तं नारदीयशिक्षायाम्-

**''षड्जं रौति मयूरो गावो रम्भन्ति चार्षभम्।**
**अजा विरौति गान्धारं क्रौञ्ची नदति मध्यमम्।।**
**पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्।**
**अश्वस्तु धैवतं रौति निषादं रौति कुञ्जरः।।''**[3]

एषां स्वराणां समुचितं व्यवस्थापनमुद्दिश्य भरतादिभिराचार्यैः विविधानि मतानि प्रस्तुतानि। निष्कर्षतश्चेदं विज्ञायते यत् लोकव्यवहृतभाषाणां स्वरव्यंजनरूपेण द्विधा वर्णविभागो विहितः। प्रातिशाख्येष्वपि स्वराणां द्वैविध्यमुक्तम् - समानाक्षराः सन्ध्यक्षराश्चेति द्विविधाः स्वरा''। तत्राकाराद्या ऋकारपर्यन्ताः समानाक्षराः। एकाराद्या औकारान्ता सन्ध्यक्षराः। नियमतस्तु समानाक्षरादिसंज्ञकानां स्वराणां त्रैविध्यं ज्ञापयितुं शक्यते - समानाक्षराः, स्वरव्यंजनोभयात्मकाः, सन्ध्यक्षराश्चेति। यतो हि ऋ लृ वर्णौ स्वरव्यंजनोभयात्मकौ स्तः।

व्यंजनवर्णा अपि त्रिधा विभज्यन्ते - स्पर्शा अन्तःस्था ऊष्माश्चेति। एषु ककाराद्या मान्ताश्च स्पर्शसंज्ञकाः। यकाराद्या वान्ताश्च अन्तःस्थाः। शकाराद्याश्चत्वारो वर्णाः विसर्जनीया, जिह्वामूलीया, उपध्मानीया, अनुस्वाराश्चेतिचत्वारोऽन्या साकल्येनाष्टविधा उष्मसंज्ञकाः। अत्र ऋक्प्रातिशाख्यं प्रमाणम्। तत्रोक्तम् 'उत्तरे अष्टावूष्माणः' इति। स्पर्शवर्णानामुच्चारणकाले जिह्वायास्तत्तत्स्थानेषु स्पर्शो भवति। स्पर्शसंज्ञकवर्णानामन्तरेव स्थितिमत्त्वात् यादीनामन्तःस्थसंज्ञा भवति। एवमेव शकारादीनामुच्चारणकाले वायौ उष्णताया आधिक्यादूष्मसंज्ञा भवति। एवं वर्णानां सामान्येन विभाजनं दर्शितम्। विशेषेण तु पाणिनीयशिक्षायां वर्णानां पञ्चरूपोपन्नता सन्दर्शिता। यथा -

**''वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः।**
**स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः।।**
**इति वर्णविदः प्राहुर्निपुणं तं निबोधत।''**[4]

अर्थात् उदात्तादिस्वरभेदेन, मात्रादिकालाभेदेन, कण्ठादि स्थानभेदेन आभ्यन्तरादिप्रयत्नभेदेन, ब्राह्यप्रयत्नाद्यनुप्रदानेन च वर्णविभागः पंचधा विज्ञातव्यः। यद्यपि पाणिनीयशिक्षायां स्वराधारेणैव अकारादिवर्णविभाजनं कृतं तथाप्यष्टाध्याय्यां उदात्तादिसंज्ञाविधायकसूत्रेभ्यः पूर्वं निमेषादिकालनियन्त्रितह्रस्वादिसंज्ञाविधायकसूत्राणामुपदेशात् सर्वप्रथमं कालाधारेणैव वर्णविभाजनस्य औचित्यं पारिलक्षितं भवति इत्योझामहोदयैरुक्तम्।

कालाधारेणैव वर्णोच्चारणं वैटयाकरणैरप्यभीष्टं प्रतिपादितम्। उक्तञ्च-

**''एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते।**
**त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्धमात्रिकम् ।।''[5]**

इति याज्ञवल्क्यशिक्षानुसारमकारादिवर्णेषु कालस्थितिश्चतुर्धाऽवलोक्यते - (1) अर्धमात्राकाल (2) एकमात्राकाल (3) द्विमात्राकाल (4) त्रिमात्राकालश्च। एषु व्यञ्जनवर्णः अर्धमात्राकालोच्चारणीयो भवति। स्वरास्तु पुनः एकमात्रिका द्विमात्रिका त्रिमात्रिकाश्च भवन्ति। त एव क्रमशो ह्रस्वदीर्घप्लुतरूपेण व्यवह्रियन्ते। आचार्यपाणिनिरपि 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इति सूत्रे ऊकालमेव निर्दिशति न तु उकालम्। याज्ञवल्क्यशिक्षायान्तु मात्राकालस्त्रिधा विभक्तः-

**''निमेषोमात्राकालः स्याद् विद्युत्कालस्तथा परे।**
**अक्षरात्तुल्ययोगाच्च मतिः स्यात् सोमशर्मणः।।''[6]**

पं. ओझामतेन उदात्तादित्रैविध्यं यत्स्वरस्योक्तं तत्र ते उदात्तादयः स्वरधर्माः सन्ति यतो हि ते ह्रस्वदीर्घप्लुतादिरूपेण अकारादीन स्वरानेव बोधयन्ति। एवं यदुदात्तादिभेदकत्वात्स्वराणामेव विभागः सम्भवति न तु व्यञ्जनानाम्। उदात्तादिभेदाद्यात्त्रैविध्यं तदपि ह्रस्वादिभेदात्पुनस्त्रैविध्येन नवधात्वमाप्नोति। पुनश्चैते नव भेदा अपि अनुनासिकाननुनासिकभेदाद् द्वैविध्यं प्राप्याष्टादशधात्वं प्राप्नुवन्ति। ऋकारस्य दीर्घमात्रत्वाद्द्वादशधात्वं भवति। एऐओऔकाराणां चापि ह्रस्वाभावात् द्वादशधात्वमेव सम्भवति। शुक्लयजुर्वेदीये प्रातिशाख्ये लृकारस्य ह्रस्वदीर्घत्वस्वीकारादष्टादशधात्वमुपपद्यते।

वर्णाभिव्यक्तिप्रक्रियान्तर्गतं वायुमेव शब्दं मन्वानेषु शिक्षाग्रन्थेषु प्रातिशाख्येषु च स्पष्टं प्रतिपादितं यत् घटपटादिशब्दोच्चारणेच्छयाऽन्तःकरणे विद्यमानः प्राणवायुः कण्ठताल्वादिस्थानेषु संघृष्टः शब्दारूपे परिणमति। वाक्यपदीये भर्तृहरिरपि प्राणवायुमेव वर्णोपादानं स्वीकरोति, उल्लिखति च -

**''लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्त्तिना ।**
**स्थानेष्वभिहतो वायुः शब्दत्वं प्रतिपद्यते ।।''[7]**

अर्थात् वक्तृविवक्षायां तत्कृतप्रयत्नेन प्राणवायौ क्रियोत्पद्यते। स एव वायुःकण्ठताल्वादिसंघृष्टश्शब्दमुत्पादयति। वस्तुतस्तु श्रोत्रेन्द्रियग्राह्या अकारादिवर्णाः प्राणवायुपरिणामा नैव सन्ति अपितु प्राणबुद्ध्योःसंस्थिताः सन्तोऽर्थावबोधकशक्तिरूपाः सन्ति। एते एव व्यक्तवाचःस्वरूमुपपादयन्ति अतएवोक्तं तत्रैव-

**''तस्य प्राणे च या शक्तिर्याच बुद्धौ व्यवस्थिता।**
**विवर्त्तमाना स्थानेषु सैषा भेदं प्रपद्यते।।''[8]**

एवं च बुद्धिप्राणगता शब्दशक्तिरेव कण्ठादिस्थानेभ्यो व्यक्ता सती स्वरव्यञ्जनरूपतां प्राप्नोति। वार्णानां स्वरूपसम्पादनाय नाभिप्रदेशजन्यो वायुः सर्वप्रथमं यस्मिन् स्थाने आघातं कृत्वा वर्णान् उत्पादयन्ति ते वर्णाःप्रक्रमेणाभिहिता भवन्ति। शुक्लयजुर्वेदीयप्रातिशाख्यानुसारं तत्प्रक्रमस्त्रिधा सम्भवति। तथा चोक्तम्-त्रीणि स्थानानि वर्णानाभुरः कण्ठःशिरस्तथा। तैत्तिरीयप्रातिशाख्यस्य वायुशरीरसमीरणात् कण्ठोरसोःसन्धाने इति कथनानुसारं कण्ठोरःप्रदेशयोर्मध्ये शब्दोत्पत्तिर्भवति। कण्ठादिस्थानेभ्यस्तु तेषां प्रतिध्वनिमात्रं श्रूयते। पाणिनीयादि शिक्षाग्रन्थेषु अकारादिवर्णानां कण्ठताल्वादयोऽष्टौ स्थानान्यभिमतानि-

**''अष्टौ स्थानानि वर्णानामुरःकण्ठः शिरस्तथा।**
**जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च।।''[9]**

पं. मधुसूदन ओझा आधुनिकशब्दशास्त्रज्ञैरभिमतानां वर्णोच्चारणोपयोगिनां सप्तविंशतिस्थानानामपि विवेचनं कुर्वन्ति। तद्यथा- (1) अन्नप्रणाली (2) स्वरयन्त्रम् (3) स्वरतन्त्री (4) काकलः (5) अभिकाकलः (6) श्वासप्रणाली (7) मुखविवरः (8) अलिजिह्वा (9) नासिकाविवरः (10) कण्ठः (11) श्वासमार्गः (12) कोमलतालु (13) मूर्धा (14) जिह्वा (15) कठोरतालु (16) वर्त्सः (17) उर्ध्वदन्तः (18) श्वासग्राहकः (19) नासिकामध्यः (20) नासिका (21) ऊर्ध्वोष्ठः (22) अधरोष्ठः (23) अधोदन्तः (24)अधोवर्त्सः (25) जिह्वाग्रभागः (26) मध्यजिह्वा (27) पश्चजिह्वा (28) जिह्वामूलम्। सर्वेषामेषामङ्गानां कण्ठादिस्थानेष्वन्तर्भावादष्टावेवोक्ताग्निस्थानानि प्रधानानि मन्तव्यानीति उक्त्वा ओझा महोदयाः पाणिनीयमभिमतमेव समर्थयन्ते।

**सन्दर्भाः**

1. वर्णसमीक्षा - 1/1
2. पाणिनीयशिक्षा - पृ. 8
3. नारदीयशिक्षा - पृ. 16
4. पाणिनीयशिक्षा - पृ. 11
5. लघुसिद्धान्तकौमुदि - पृ. 13
6. याज्ञवल्क्यशिक्षा -पृ. 22
7. वाक्यपदीयम् - ब्रह्मकाण्डम्
8. वाक्यपदीयम् - ब्रह्मकाण्डम्
9. पाणिनीयशिक्षा - पृ. 6